# Dhundhiraja Vinayaka Ganesha Stuti

# ઢુણ્ઢિરાજવિનાયકગણેશસ્તુતિઃ

## Document Information

Text title : Dhundhiraja Vinayaka Ganesha Stuti

File name : DhuNDhirAjavinAyakagaNeshastutiH.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Divya k Suresh

Proofread by : Divya k Suresh, NA

Description/comments : kAshi khaNDa adhyAya 57 shlokAH 17-41

Latest update : April 17, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# ઢુણ્ઢિરાજવિનાયકગણેશસ્તુતિઃ

જય વિઘ્નકૃતામાદ્ય ભક્તનિર્વિઘ્નકારક ।
અવિઘ્નવિઘ્નશમન મહાવિઘ્નૈકવિઘ્નકૃત્ ॥ ૧॥

જય સર્વગણાધીશ જય સર્વગણાગ્રણી ।
ગણપ્રણતપાદાબ્જ ગણનાતીતસદ્ગુણ ॥ ૨॥

જય સર્વગ સર્વેશ સર્વબુદ્ધ્યેકશેવધે ।
સર્વમાયાપ્રપઞ્ચજ્ઞ સર્વકર્માગ્રપૂજિત ॥ ૩॥

સર્વમઙ્ગલમાઙ્ગલ્ય જય ત્વં સર્વમઙ્ગલ ।
અમઙ્ગલોપશમન મહામઙ્ગલહેતુક ॥ ૪॥

જય સૃષ્ટિકૃતાં વન્દ્ય જય સ્થિતિકૃતાનત ।
જય સંહૃતિકૃત્સ્તુત્ય જય સત્કર્મસિદ્ધિદ ॥ ૫॥

સિદ્ધવન્દ્યપદામ્ભોજ જય સિદ્ધિવિધાયક ।
સર્વસિદ્ધ્યેકનિલય મહાસિદ્ધ્યૃદ્ધિસૂચક ॥ ૬॥

અશેષગુણનિર્માણ ગુણાતીત ગુણાગ્રણી ।
પરિપૂર્ણચરિત્રાર્થ જય ત્વં ગુણવર્ણિત ॥ ૭॥

જય સર્વબલાધીશ બલારાતિ બલપ્રદ ।
બલાકોજ્જ્વલ દન્તાગ્ર બાલાબાલપરાક્રમ ॥ ૮॥

અનન્તમહિમાધાર ધરાધર વિદારણ ।
દન્તાગ્રપ્રોતા દિઙ્નાગ જય નાગાવિભૂષણ ॥ ૯॥

યે ત્વાં નમન્તિ કરુણામયદિવ્યમૂર્તે
    સર્વૈનસામપિ ભુવો ભુવિમુક્તિભાજઃ ।
તેષાં સદૈવ હરસીહમહોપસર્ગા-
    ન્સ્વર્ગાપવર્ગમપિ સંપ્રદદાસિ તેભ્યઃ ॥ ૧૦॥

યે વિઘ્નરાજ ભવતા કરુણાકટાક્ષૈઃ
    સમ્પ્રેક્ષિતાઃ ક્ષિતિતલે ક્ષણમાત્રમત્ર ।
તેષાં ક્ષયન્તિ સકલાન્યપિકિલ્વિષાણિ
    લક્ષ્મીઃ કટાક્ષયતિતાન્પુરુષોત્તમાન્હિ ॥ ૧૧॥

યે ત્વાં સ્તુવન્તિ નતવિઘ્નવિઘાત દક્ષ-
    દાક્ષાયણીહૃદયપઙ્કજતિગ્મરશ્મે ।
શ્રૂયન્ત એવ ત ઇહ પ્રથિતા ન ચિત્રં
    ચિત્રં તદત્ર ગણપા યદહો ત એવ ॥ ૧૨॥

યે શીલયન્તિ સતતં ભવતોઽઙ્ઘ્રિયુગ્મં
    તે પુત્રપૌત્રધનધાન્યસમૃદ્ધિભાજઃ ।
સંશીલિતાઙ્ઘ્રિકમલા બહુલાબહુભૃત્યવર્ગૈ-
    ર્ભૂપાલભોગ્યકમલાં વિમલાં લભન્તે ॥ ૧૩॥

ત્વં કારણં પરમકારણકારણાનાં
    વેદ્યોઽસિ વેદવિદુષાં સતતં ત્વમેકઃ ।
ત્વં માર્ગણીયમસિ કિઞ્ચન મૂલવાચાં
    વાચામગોચરચરાચરદિવ્યમૂર્તે ॥ ૧૪॥

વેદા વિદન્તિ ન યથાર્થતયા ભવન્તં
    બ્રહ્માદયોઽપિ ન ચરાચર સૂત્રધાર ।
ત્વં હંસિ પાસિ વિદધાસિ સમસ્તમેકઃ
    કસ્તેસ્તુતિવ્યતિકરોમનસાપ્યગમ્ય ॥ ૧૫॥

ત્વદ્દુષ્ટદૃષ્ટિવિશિખૈર્નિહતાન્નિહન્મિ
    દૈત્યાન્પુરાન્ધકજલન્ધરમુખ્યકાંશ્ચ ।
કાસ્યાસ્તિ શક્તિરિહ યસ્ત્વદૃતેઽપિ તુચ્છં
    વાઞ્છેદ્વિધાતુમિહ સિદ્ધિદકાર્યજાતમ્ ॥ ૧૬॥

અન્વેષણે ઢુણ્ઢિરયં પ્રથિતોઽસ્તિધાતુઃ
    સર્વાર્થઢુણ્ઢિતતયા તવ ઢુણ્ઢિ નામ ।
કાશીપ્રવેશમપિ કો લભતેઽત્ર દેહી
    તોષં વિના તવ વિનાયકઢુણ્ઢિરાજ ॥ ૧૭॥

ઢુણ્ઢે પ્રણમ્યપુરતસ્તવપાદપદ્મં
    યો માં નમસ્યતિ પુમાનિહ કાશિવાસી ।

તત્કર્ણમૂલમધિગમ્ય પુરા દિશામિ
 તત્કિઞ્ચિદત્ર ન પુનર્ભવતાસ્તિ યેન ॥ ૧૮॥

સ્નાત્વા નરઃ પ્રથમતો મણિકર્ણિકાયા-
 મુદ્ધૂલિતાઙ્ઘ્રિયુગલસ્તુ સચૈલમાશુ ।
દેવર્ષિમાનવપિતૄનપિ તર્પયિત્વા
 જ્ઞાનોદતીર્થમભિલભ્ય ભજેત્તતસ્ત્વામ્ ॥ ૧૯॥

સામોદમોદકભરૈર્વરધૂપદિપૈ-
 ર્માલ્યૈઃ સુગન્ધબહુલૈરનુલેપનૈશ્ચ ।
સમ્પ્રીણ્યકાશિનગરીફલદાનદક્ષં
 પ્રોક્ત્વાથ માં ક ઇહ સિધ્યતિ નૈવ ઢુણ્ઢે ॥ ૨૦॥

તિર્થાન્તરાણિ ચ તતઃ ક્રમવર્જિતોઽપિ
 સંસાધયન્નિહ ભવત્કરુણાકટાક્ષૈઃ ।
દૂરીકૃતસ્વહિતઘાત્યુપસર્ગવર્ગો
 ઢુણ્ઢે લભેદવિકલં ફલમત્ર કાશ્યામ્ ॥ ૨૧॥

યઃ પ્રત્યહં નમતિ ઢુણ્ઢિવિનાયકં ત્વાં
 કાશ્યાં પ્રગે પ્રતિહતાખિલવિઘ્નસઙ્ઘઃ ।
નો તસ્ય જાતુ જગતીતલવર્તિ વસ્તુ
 દુષ્પ્રાપમત્ર ચ પરત્ર ચ કિઙ્ચનાપિ ॥ ૨૨॥

યો નામ તે જપતિ ઢુણ્ઢિવિનાયકસ્ય
 તં વૈ જપન્ત્યનુદિનં હૃદિ સિદ્ધયોઽષ્ટૌ ।
ભોગાન્વિભુજ્ય વિવિધાન્વિબુધોપભોગ્યા-
 ન્નિર્વાણયા કમલયા પ્રિયતે સ ચાન્તે ॥ ૨૩॥

દૂરેસ્થિતોઽપ્યહરહસ્તવ પાદપીઠં
 યઃ સંસ્મરેત્સકલસિદ્ધિદ ઢુણ્ઢિરાજ ।
કાશીસ્થિતે રવિકલં સફલં લભેત
 નૈવાન્યથા ન વિતથા મમ વાક્કદાચિત્ ॥ ૨૪॥

જાને વિઘ્નાનસઙ્ખ્યાતાન્વિનિહન્તુમનેકધા ।
ક્ષેત્રસ્યાસ્ય મહાભાગ નાનારૂપૈરિહસ્થિતઃ ॥ ૨૫॥

ઇતિ સ્કન્દપુરાણે કાશીખણ્ડે સપ્તપઞ્ચાશતમોઽધ્યાન્તર્ગતા

ઢુણ્ઢિવિનાયકસ્તુતિઃ સમાપ્તા ।

અધ્યાય ૫૭ શ્લોકાઃ ૧૭-૪૧

Encoded and proofread by Divya K Suresh, NA

*Dhundhiraja Vinayaka Ganesha Stuti*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*